दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदशुक्लचतुर्थी-पञ्चमी
भाद्रपद 30 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-08 ■ वर्ष-5 ■ अङ्क-326 | 1 | सितम्बर 15, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 जर्मनीदेशस्य अलेक्जेण्डर ज्वेरेवः यू.एस. मुक्त टेनिस-क्रीडायाः पुरुष-एकल-वर्गस्य स्पर्धां विजितवान्

4 चिट्टा'-विरुद्धं सङ्ग्रामे युनः भवेयुः सहभागिनः; एनआईटी-हमीरपुर-संस्थाने छात्रैः सह सम्भाषणे अवदत् डीजीपी-अशोक-तिवारी

8 भिवानीविभागे २३ सम्भाषण-शिबिराणाम् अभवत् भव्यं समापनम्

## द्विसहस्ररूप्यकाणां (2,000) पर्यन्तं युनिफाइड पेमेंट्स इन्टरफेस (UPI) इत्यस्य विनिमयेषु बैङ्कद्वारा कोऽपि शुल्कः न प्रयोक्तुं शक्यते




केन्द्रसर्वकारस्य सोमवासरे स्पष्टीकृतं यत् द्विसहस्ररूप्यकाणां (2,000) पर्यन्तं युनिफाइड पेमेंट्स इन्टरफेस (UPI) विनिमयेषु बैङ्कद्वारा कोऽपि शुल्कः न प्रयोक्तुं शक्यते। तथैव रुपे-डेबिट-कार्ड-माध्यमेन द्विसहस्ररूप्यकाणां पर्यन्तं कृते व्यये अपि कोऽपि शुल्कः न ग्रहीष्यते। वित्तमन्त्रालयस्य पक्षतः निर्गते राजपत्रे (गजट-अधिसूचनायाम्) रुपे-डेबिट-कार्डम् तथा द्विसहस्ररूप्यकाणां पर्यन्तं UPI-विनिमयम् आधिकारिकरूपेण 'इलेक्ट्रॉनिक-व्यय-माध्यमम्' इति रूपेण अधिसूचितम् अस्ति।

### कस्य अधिनियमस्य अन्तर्गतः निर्णयः गृहीतः?

अधिसूचनायाम् उक्तं यत् कोऽपि बैङ्कः अथवा व्ययप्रणालीसंचालकः एतेभ्यः माध्यमेभ्यः व्ययं कुर्वतः प्राप्नुवतः वा कस्यचित् अपि व्यक्तितः प्रत्यक्षतया परोक्षतया वा किमपि शुल्कं न ग्रहीयात्। सर्वकारः अयम् निर्णयः 'पेमेंट एण्ड सेटलमेंट सिस्टम्स एक्ट, 2007' इत्यस्य अधिकाराणां उपयोगं कृत्वा गृहीतवान्।

### UPI-विनिमये शुल्कः नास्ति, सर्वकारेन भ्रमः दूरीकृतः

वित्तमन्त्रालयेन उक्तम् यत् अस्य कदमस्य उद्देश्यं UPI-विनिमयेषु प्रयोक्तुं शक्यमानानां शुल्कानां विषये निर्मितायां भ्रमस्य स्थितौ निराकरणम् अस्ति। गतमसे अपि केन्द्रसर्वकारेन स्पष्टीकृतं यत् सामान्यग्राहकेभ्यः UPI-माध्यमेन कृताः व्यक्ति-से-व्यक्ति (P2P) भुक्तानि पूर्णरूपेण निःशुल्कानि भविष्यन्ति।

### वणिज्भिः (व्यापारीभिः) सह सम्बद्धनीतौ सर्वकारस्य पक्षः कः?

उल्लेखनीयं यत् केन्द्रसर्वकारेण शुल्कम् अनादाय निर्णयः कुर्वन् उक्तं यत् वणिज्भिरपि कस्यापि व्यापकरूपेण प्रयुक्तस्य 'मर्चेंट डिस्काउंट रेट' (MDR) इत्यस्य भारः न दातव्यः। वित्तमन्त्रालयस्य अनुसारं यदि भविष्ये MDR प्रयुक्तोऽपि भवत्, तर्हि सः केवलम् केषाञ्चन विशेषवर्गस्य व्यापारिक-विनिमयानाम् उपरि, निश्चितसीमातः अधिकराशियुक्तानां व्ययानाम् उपरि, अत्यन्तलघुरूपेण च प्रयोक्ष्यते।

**स्पष्टीकरणस्य आवश्यकता किमर्थम् आसीत्?**

सर्वकारेणैतदप्युक्तं यत् तादृश्यां स्थितौ अपि शुल्कः डेबिट- अथवा क्रेडिट-कार्ड-विनिमयानाम् उपरि प्रयुज्यमानस्य MDR इत्यस्य तुलने अत्यन्तं न्यूनः भविष्यति। इदं स्पष्टीकरणं तस्मिन् काले आगतं यदा सम्प्रति 'पेमेंट एण्ड सेटलमेंट सिस्टम्स एक्ट, 2007' इत्यस्मिन् संशोधनानाम् अनन्तरं UPI-विनिमयेषु शुल्कप्रयोगाशङ्कायाः विषये चर्चा प्रचलति स्म। एवं च सम्प्रति सर्वकारेण चित्रं स्वच्छीकृतं यत् द्विसहस्ररूप्यकाणां पर्यन्तं UPI-व्यये रुपे-डेबिट-कार्ड-माध्यमेन कृते व्यये च ग्राहकेभ्यः कोऽपि शुल्कः न ग्रहीष्यते।

## कृत्स्ने हि देशे गतदिवसे गणेश चतुर्थीपर्व महता भक्ति-भावेन श्रद्धया च आचरितः

कृत्स्ने हि देशे गणेश चतुर्थीपर्व महता भक्ति-भावेन श्रद्धया च आचर्यते। अयं पावनदिवसः ऋद्धि-बुद्धि-सिद्धीनां प्रतीक-भूतस्य भगवतः श्रीगणेशस्य जन्मोत्सवत्वेन आमान्यते। विनायक चतुर्थी उत गणेशोत्सवः इति नाम्ना प्रसिद्धः अयं दिनविशेषः दश-दिवसीयानाम् उत्सव-कार्यक्रमाणां शुभारम्भं सूचयति, यस्मिन् भक्ताः स्वकीय-गृहेषु मण्डपेषु च भगवतः गणेशस्य मृण्मयर्थी प्रतिमानं प्रतिष्ठाप्य विधिवत् पूजार्चनं कुर्वन्ति। प्रधानमन्त्रिणा नरेन्द्रमोदिना देशवासिभ्यः गणेशचतुर्थी पर्वणः शुभकामनाः प्रदत्ताः।

## अद्यतनीयं सुभाषितम्

**मा भ्राता भ्रातरं द्विक्षन्, मा स्वसारमुत स्वसा।**
**सम्यञ्चः सव्रता भूत्वा, वाचं वदत भद्रया॥**

भावार्थः- भाई अपने भाई से कभी द्वेष नहीं करें, बहन अपनी बहन से द्वेष नहीं करें, समान गति से एक दूसरे का आदर- सम्मान करते हुए परस्पर मिलकर कर्मों को करने वाले होकर संभाषण करें।






## सेनायाः अथकप्रयत्नैः पञ्चविंशत्युत्तर-द्विसहस्र-तमे वर्षे उत्तर-सीमासु चीनदेशस्य सैनिकानाम् नियोजने उल्लेखनीया न्यूनता दृश्यते ।

जम्मू-कश्मीरस्य सुरक्षास्थितिः अपि पूर्णतया नियन्त्रणे वर्तते। प्रशासनेन उक्तम् यत् सेनायाः अथकप्रयत्नैः जम्मू-कश्मीरस्य सुरक्षास्थितिः पूर्णतया नियन्त्रणे वर्तते । गत वर्षस्य नवीनतम वार्षिक प्रतिवेदने रक्षामन्त्रालयेन अवलोकितं यत् एतेषां प्रयत्नानाम् परिणामेण हिंसायां महती न्यूनता जाता। विरोध-प्रकरणानि अपि न्यूनतां गतानि, सममेव प्रस्तर-प्रहार-घटनाः अपि नाभवन् । चीनदेशेन सम्बद्धा समग्रस्थितिः अपि प्रतिवेदने प्रकाशिता अस्ति। पञ्चविंशत्युत्तर-द्विसहस्र-तमे वर्षे उत्तर-सीमासु चीनदेशस्य सैनिकानाम् नियोजने उल्लेखनीया न्यूनता दृश्यते । वास्तविक-नियन्त्रण-रेखायां पारम्परिक प्रशिक्षण-क्षेत्रेषु च समकक्षं बलं नियोजितम्। भारतस्य चीनस्य च मध्ये राजनैतिक-कूटनीतिक-सैन्य-स्तरयोः द्विपक्षीयसङ्गतिः उत्तरसीमासु सकारात्मकविकासान् जनयति, येन परिणामेण अधिका स्थिरता अभवत् ।

# ब्रिक्स-देशानां नेतारः सामाजिक-आर्थिक-विकासस्य, राष्ट्रिय सुरक्षायाः, सर्वेषां राष्ट्राणां कल्याणस्य च कृते ऊर्जासुरक्षा महत्त्वपूर्णा आधारशिला इति प्रतिपादितवन्तः




ब्रिक्स-देशानां नेतारः सामाजिक-आर्थिक विकासस्य, राष्ट्रिय सुरक्षायाः, सर्वेषां राष्ट्राणां कल्याणस्य च कृते ऊर्जासुरक्षा महत्त्वपूर्ण आधारशिला इति प्रतिपादितवन्तः। नवदेहल्याम् आयोजिते द्विदिवसीये ब्रिक्स-शिखर सम्मेलने सदस्यराष्ट्रैः ऊर्जाविपणौ स्थिरतां वर्धयितुं, विविध स्रोतसां माध्यमेन ऊर्जसः निर्बाध प्रवाहं सुनेश्चितुं, महत्त्वपूर्ण-ऊर्जा-अवसंर संरक्षणं च कर्तुं आवश्यकता प्रतिपादिता। शिखर सम्मेलने प्रधानमन्त्री नरेन्द्रमोदी समाह्वानं दत्तवान् यत् प्रौद्योगिक्याः महत्त्वपूर्ण-खनिनां शस्त्रीकरणं प्रगतौ बाधकं भवितुम् अर्हति। ब्रिक्स शिखर सम्मेलनस्य सर्वाधिकं महत्त्वपूर्ण परिणामं नवदिल्लीनिर्णयस्य स्वीकृतिः आसीत्। अत्र प्रमुखेषु भू-राजनैतिकेषु आर्थिकेषु च विषयेषु सहयोगस्य दृष्टिकोणः प्रतिपादितः। पश्चिम-एशियायाः परिस्थितिं दृष्ट्वा ब्रिक्स-नेतारः अधिकतम-संयमस्य, संवादस्य कूटनीतेः च आह्वानं कृतवन्तः । ब्रिक्स-नेतारः नागरिकानां नागरिक अवसंरचनायाः च रक्षणस्य आवश्यकतां बलपूर्वकं प्रतिपादितवन्तः। नेतृभिः सर्वेषु रूपेषु आतङ्कवादस्य निन्दा कृता आतंकवादस्य प्रति शून्य-सहिष्णुतायाः नीतिश्च पुनः दृढीकृता। संक्रामक रोगाणां निवारणाय प्रतिक्रियायै च 'ब्रिक्स-एकीकृत-प्रारम्भिक समाह्वान-व्यवस्था' विषये अपि सहमतिः प्राप्ता।

# जर्मनीदेशस्य अलेक्जेण्डर ज्वेरेवः यू.एस. मुक्त टेनिस-क्रीडायाः पुरुष-एकल-वर्गस्य स्पर्धा विजितवान्



जर्मनीदेशस्य अलेक्जेण्डर ज्वेरेवः यू.एस. मुक्त टेनिस-क्रीडायाः पुरुष एकल-वर्गस्य स्पर्धा विजितवान् सः गतरात्रौ न्यूयार्क-नगरे अमरीकायाः बेन-शेल्टनं इत्येनं षट्-त्रि, सप्त-षट्, सप्त-द्वौ इति अङ्कैः पराजितवान्। विजयोऽयं षड्विंशत्यदिक-द्विसहस्रतमवर्षे अलेक्जेण्डर-ज्वेरेवस्य द्वितीयः प्रमुख विजयः वर्तते।

# भारतेन ओमानतटे 'एमटी-ई-एल-गया' इति वाणिज्यिक पोते जातस्य आक्रमणस्य निन्दा कृता



भारतेन ओमानतटे 'एमटी-ई-एल-गया' इति वाणिज्यिक पोते जातस्य आक्रमणस्य निन्दा कृता। एकस्यां विज्ञप्तौ ओमानदेशे स्थितेन भारतीय-दूतावासेन उक्तं यत् अद्यावधि त्रयोदश भारतीय-दलसदस्याः सुरक्षिताः उद्धृताः, यद्यपि एकस्य विलुप्तस्य भारतीयनागरिकस्य अन्वेषणम् उद्धारकार्यं च निरन्तरं विधीयते। दूतावासेन उक्तं यत् स्थितिः सूक्ष्मतया निरीक्ष्यते, अन्वेषण-उद्धारकार्य ओमान-अधिकारीभिः सह समन्वयम् विधीयते। भारतीय दूतावासेन भारतीयनागरिकान् उद्धर्तुं लब्धस्य सहयोगस्य कृते ओमान प्राधिकारिभ्यः धन्यवादः अपि ज्ञापितः ।

## विंशत्युत्तर-द्विसहस्र-तमवर्षाम् आरभ्य नवसु राज्येषु सप्तचत्वारिंशदुत्तरैकशतं अङ्गारखण्डानां सघोषविक्रयः कृतः



सर्वकारेण उक्तं यत् विंशत्युत्तर-द्विसहस्र-तमवर्षाम् आरभ्य नवसु राज्येषु सप्तचत्वारिंशदुत्तरैकशतं अङ्गारखण्डानां सघोषविक्रयः कृतः। कृष्णाङ्गार मन्त्रालयेन उक्तं यत् अनेन प्रतिवर्षम् अनुमानतः सार्धसप्तचत्वारिंशत्-सहस्र-कोटिरूप्यकाणाम् आयः अथ चतुर्दशांशोत्तर-नव-लक्षं वृत्तयः जनयिष्यन्ते । मन्त्रालयेन उक्तं यत् गते वित्तीयवर्षे आवण्टित-वाणिज्यिक खनिभ्यः प्राप्तः सकलायः प्रायः त्रिसहस्रं नवति कोटिरूप्यकाणि आसीत्।

## प्रधानमन्त्री नरेन्द्रमोदी सेमीकॉन-इण्डिया इत्यस्य पञ्चम-संस्करणम् उद्घाटितवान्।

प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां यशोभूमिस्थले ऐषमः सेमीकॉन-इण्डिया इत्यस्य पञ्चम-संस्करणम् उद्घाटितवान्। अस्मिन् कार्यक्रमे षडशताधिकाः प्रदर्शकाः, त्रिशतम् अन्ताराष्ट्रियसमवायाः, चत्वारिंशदधिकेभ्यः देशेभ्यः प्रतिभागिनः च भागं गृहीतवन्तः । ध्यातव्यं वर्तते यत् अस्यां प्रदर्शिन्यां षड् राष्ट्राणां द्वाविंशतिः राज्यप्रशासनानां मण्डपान् समेत्य स्टार्ट अप् इत्येतेषां च मण्डपाः अन्तर्निहिताः सन्ति ।

## हिन्दी-दिवसावसरे एकस्मिन् दृश्याङ्कन-सन्देशे गृहमन्त्री देशवासिभ्यः शुभकामनाः अयच्छत्

केन्द्रीय गृहमन्त्री अमित शाहः अवोचत् यत् भारतस्य भाषावैविध्यं देशे विविधतायाम् एकतायाः भवनां द्रढयति। हिन्दी-दिवसावसरे एकस्मिन् दृश्याङ्कन-सन्देशे गृहमन्त्री देशवासिभ्यः शुभकामनाः अयच्छत् । तेन उक्तं यत् भारतं भाषिकवैविध्ययुतं सांस्कृतिकसमृद्धिपरं च राष्ट्रं विद्यते। गृहमन्त्री अवोचत् यत् नैकाः भाषाः भारतस्य शक्तयः सन्ति न तु दुर्बवता। तेन प्रोक्तं यत् हिन्दी भाषायः उन्नतिः तदैव वर्तते यदा सा अन्यासां भारतीय-भाषाणां सम्मानं प्रचार-प्रसारं संरक्षणं च कुर्यात्। हिन्दी-दिवसः आदेशम् आयोज्यते। अवधेयमस्ति यत् गतशताब्दस्य ऊनपञ्चाशत् तमे वर्षे संविधानसभया देवनागर्यां निबद्धा हिन्दी भारतस्य राजभाषा रूपेण स्वीकृता ।




# जापान-पैरा-बैडमिंटन-इण्टरनेश्नल-क्रीडायाम् अरुणाचलप्रदेशस्य बिरी-टाकर-महोदयः कास्यपदकं जितवान्

अरुणाचलप्रदेशस्य पैरा-बैडमिंटन-क्रीडकः बिरी-टाकरः जापानीज-पैरा-बैडमिंटन-इण्टरनेश्नल-प्रतियोगितायां कास्यपदकं प्राप्तवान् अस्ति। टोक्यो-नगरे ८ तः १३ सेप्टेम्बर्-दिनाङ्कपर्यन्तम् आयोजिते अस्मिन् स्पर्धायाम् सः एतत् पदकम् स्वनामधेयं कृतवान्।
मुख्यमन्त्री पेमा-खांडू-महोदयः स्वाङ्गीय-सोशल-मीडिया-माध्यमेन अस्य अन्तर्राष्ट्रीय-गौरवस्य कृते तं अभिनन्दितवान्, तस्य भविष्यस्य यात्रायाम् निरन्तर-सफलतायाः कामनां च कृतवान्।

# आईएपी-अन्तर्स्नातक-प्रश्नोत्तरी-स्पर्धायां
## जीएमसीएच-३२ चण्डीगढ़-दलं विजयी; एम्स-बिलासपुर-दलं द्वितीयं, टाण्डा-दलं च तृतीयं स्थानम् अलभत्



**हिमसंस्कृतवार्ता — काङ्गड़ा।**
डॉ. राजेन्द्रप्रसाद-राजकीय-आयुर्विज्ञान-चिकित्सा-महाविद्यालयस्य (टाण्डा-चिकित्सालयस्य) अतिथिगृह-व्याख्यान-कक्षे रविवासरे 'इण्डियन्-एकेडमी-ऑफ़-पीडियाट्रिक्स' (IAP) इत्यस्य अन्तर्स्नातक-प्रश्नोत्तरी-स्पर्धायाः हिमाचलप्रदेश-मण्डल-चरणम् (Division Round) आयोजितम्। अस्मिन् सङ्घर्षे हिमाचलप्रदेशस्य विभिन्नेभ्यः आयुर्विज्ञान-महाविद्यालयेभ्यः सह 'जीएमसीएच' (GMCH) सेक्टर-३२ चण्डीगढ़-दलम् अपि भागम् अगृह्णात्। तीव्रायाः प्रतिस्पर्धायाः अनन्तरं जीएमसीएच-सेक्टर-३२ चण्डीगढ़-दलेन विजय-किरीटं स्वनाम्नि कृतम्।
स्पर्धायां टाण्डा-महाविद्यालयात् सुनिधिः, आरती-कटवालश्च; आईजीएमसी-शिमलातः तेजस्विनी, पलक-शर्मा च; एसएलबीएसएमसी-मण्डीतः श्रेया, देवांशी च; डॉ. आरकेजीएमसी-हमीरपुरतः मेघना-शर्मा, इशानी-कुमारी च; डॉ. वायएसपीजीएमसी-नाहनतः रुधानी-भूषणः, रितिका-चौहानश्च; एमएमयू-सोलनतः साक्षी, कानन-सूदश्च; एम्स-बिलासपुरतः ध्रुवसिंहः, दिशान्त-शर्मा च; तथा जीएमसीएच-सेक्टर-३२ चण्डीगढ़तः विभव-अग्रवालः, लक्ष्यजीतसिंहश्च भागम् अवहन्।

### संयुक्त-तत्त्वावधाने आयोजनम्
स्पर्धायाः संयोजनं बाल-रोग-विभागेन (Pediatrics) तथा च छात्र-केन्द्रीय-सङ्घेन (SCA) संयुक्ततया विहितम्। अस्मिन् डॉ. नवेन्दु-चौधरी मण्डल-संयोजकः (Divisional Coordinator) आसीत्, यत्रैव डॉ. जीवकः डॉ. अक्षतश्च प्रश्नोत्तरी-सञ्चालकस्य (Quiz Master) दायित्वम् अन्वतिष्ठताम्। एससीए-अध्यक्षः डॉ. आशीष-चौहानः डॉ. विमलेशश्च अङ्क-गणकस्य (Scorer) कार्यभारं निरवहताम्।
प्रारम्भिक-मण्डल-चरणे (Pre-Divisional Round) मण्डी-हमीरपुर-महाविद्यालययोः दले निष्कासिते अभवताम्, अन्यानि षट् दलानि च अन्तिम-मण्डल-चरणे (Final Round) प्रविष्टानि। अन्तिम-सङ्घर्षे षट् चक्राणि (Rounds) आयोजितानि, प्रति-चक्रे च षट् प्रश्नाः पृष्टाः। प्रतिभागि-दलानां मध्ये प्रारम्भादेव तीव्रा स्पर्धा दृष्टा।

### टाई-ब्रेकर-माध्यमेन निर्णयः
अन्तिम-चरणे शीर्ष-स्थानाय समतायां सत्यां 'टाई-ब्रेकर'-चरणं कारितम्। अस्मिन् जीएमसीएच-सेक्टर-३२ चण्डीगढ़-दलस्य विभव-अग्रवालः लक्ष्यजीतसिंहश्च विजयी अभवताम्। एम्स-बिलासपुरस्य ध्रुवसिंहः दिशान्त-शर्मा च द्वितीयं, टाण्डा-महाविद्यालयस्य सुनिधिः आरती-कटवालश्च तृतीयं स्थानम् अलभेताम्।
चण्डीगढ़-दलस्य विजयी-गणः अधुना अक्टूबर्-मासे राजस्थानस्य उदयपुरे आयोज्यमाने क्षेत्रीय-चरणे (Zonal Round) हिमाचल-मण्डलस्य प्रतिनिधित्वं विधास्यति। कार्यक्रमस्य मुख्यातिथयः टाण्डा-महाविद्यालयस्य कार्यवाहक-प्राचार्याः डॉ. विजय-अरोड़ा-महोदयाः आसन्। तैः समेषां छात्राणां पालकानां च अभिनन्दनं कृत्वा ज्ञानवर्धक-सन्देशेन सह शुभकामनाः प्रदत्ताः। कार्यक्रमान्ते मुख्यातिथिभिः विजेतृभ्यः प्रतिभागिभ्यश्च पुरस्काराः प्रशस्ति-पत्राणि च वितरितानि।




## अन्तर्राष्ट्रियक्रिकेटपरिषद् (ICC) पाकिस्थानोपरि स्पर्धा-शुल्कस्य ५० प्रतिशतं दण्डम्
प्रयुक्तवतीपाकिस्थानेन इङ्ग्ल्याण्डविरुद्धे तृतीये क्रिकेट-टेस्ट-स्पर्धायां मन्दगत्या कन्दुकक्षेपणम् कृतम्, यस्य कारणेन त्सुपरि मैच-शुल्कस्य पञ्चाशत् (50) प्रतिशतं दण्डः आरोपितः अस्ति तथा च विश्व-टेस्ट-चैम्पियनशिप-प्रतियोगितायाः तस्य एकादश (11) अङ्काः न्यूनीकृताः सन्ति। अन्तर्राष्ट्रियक्रिकेटपरिषद्या (ICC) उक्तं यत् अङ्कानां न्यूनीकरणेन पाकिस्थानः विश्व-क्रिकेट-टेस्ट-चैम्पियनशिप-अङ्कतालिकायां नवमे (9वें) स्थाने आगतः अस्ति।

# वन-क्रीडा-प्रतियोगितायाः आयोजकानां प्रतिभागिनां च मुख्यमन्त्रिणा कृता प्रशंसा; विजेतृभ्यः प्रदत्तम् अभिनन्दनम्




**हिमसंस्कृतवार्ता — शिमला।**
वन-विभागस्य राज्य-स्तरीय-क्रीडा-कर्तव्य-प्रतियोगितायाः सफलायोजने मुख्यमन्त्री सुखविन्दरसिंहसुक्खु-महोदयः प्रतिभागिनाम् आयोजकानां च भृशं प्रशंसां कृतवान्, विजेतृभ्यश्च अभिनन्दनं समर्पितवान्। विभागस्य सप्तविंशतितमायाः (२७) वार्षिक-क्रीडा-कर्तव्य-प्रतियोगितायाः आयोजनं ११ सितम्बर-तः १३ सितम्बर २०२६ पर्यन्तं रामपुरे अभवत्, यस्मिन् राज्यस्य विभिन्नेभ्यः भागेभ्यः समागताः एक-सहस्राधिकाः (१०००+) क्रीडकाः भागम् अवहन्। विविध-क्रीडासु उत्कृष्ट-प्रदर्शन-कर्तृभ्यः क्रीडकेभ्यः वर्धापनं वितरन् मुख्यमन्त्री तेषां समर्पणस्य, कठोर-परिश्रमस्य, अनुशासनस्य, क्रीडा-भावनायाश्च श्लाघां कृतवान्। सः अवदत् यत् क्रीडाः केवलं शारीरिक-स्वास्थ्यं मानसिक-सन्तुलनं च न संवर्धयन्ति, अपि तु समष्टि-एकताम् नेतृत्व-क्षमतां, दृढ-सङ्कल्पं, स्वस्थ-स्पर्धा-भावम् इत्यादीन् गुणान् अपि विकसयन्ति। मुख्यमन्त्रिणा समेषां प्रतिभागिनां सहभागिता प्रशंसिता। सः प्रोक्तवान् यत् एतादृशाः क्रीडा-कार्यक्रमाः कर्मचारिणां मध्ये भ्रातृभावं सहयोग-भावनां च दृढीकुर्वन्तः प्रतिभा-प्रदर्शनाय उत्तमम् अवसरं कल्पयन्ति।

### पारिस्थितिक-सन्तुलने वन-कर्मचारिणां महत्त्वपूर्णं योगदानम्
मुख्यमन्त्रिणा प्रतिपादितं यत् वन-विभागः राज्यस्य समृद्ध-वन-सम्पदः संरक्षणाङ्गने तथा च पारिस्थितिक-सन्तुलनस्य स्थापने महतीं भूमिकां निर्वहति। वन-जैवविविधता-संरक्षणे प्राकृतिक-संसाधनानां स्थायी-प्रबन्धने च वन-कर्मचारिणां योगदानम् अतीव महत्त्वपूर्णं वर्तते। विभागीय-कर्मचारिभ्यः आयोज्यमानाः एते क्रीडा-समारोहाः तान् शारीरिक-दृष्ट्या स्वस्थान् कुर्वन्ति, तेषु पारस्परिक-सौहार्दं च संवर्धयन्ति।
सुक्खु-महोदयः अवदत् यत् राज्य-सर्वकारः क्रीडा-संवर्धनाय कर्मचारिषु युवसु च सन्तुलित-जीवन-शैल्याः विकासाय कटिबद्धः अस्ति। क्रीडासु नियमित-सहभागितया शारीरिक-क्षमता वर्धते, मानसिक-अवसादः शाम्यति, कार्य-दक्षतायां च परिष्कारः भवति।
अस्यां प्रतियोगितायाम् हमीरपुर-वन-वृत्तम् 'सर्वश्रेष्ठ-विजेतृ' घोषितम्, यत्रैव रामपुर-वन-वृत्तं द्वितीय-स्थाने अवर्तत।

# चिट्टा'-विरुद्धं सङ्ग्रामे युनः भवेयुः सहभागिनः; एनआईटी-हमीरपुर-संस्थाने छात्रैः सह सम्भाषणे अवदत् डीजीपी-अशोक-तिवारी



**हिमसंस्कृतवार्ता — हमीरपुरम्।**
मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य नेतृत्वे प्रचलन्तं 'चिट्टा'-विरोधि-जनान्दोलनं सुदृढीकर्तुं हिमाचलप्रदेश-आरक्षि-विभागेन सोमवासरे 'एनआईटी-हमीरपुर'-संस्थानस्य छात्रैः सह संवादः कृतः। राष्ट्रिय-प्रौद्योगिकी-संस्थानस्य निमन्त्रणेन आयोजिते अस्मिन् कार्यक्रमे आरक्षि-महानिदेशकः (DGP) अशोक-तिवारी-महोदयः संस्थानस्य स्नातक-स्नातकोत्तर-छात्रान् 'चिट्टा'-इत्यस्य घातक-मादक-द्रव्यस्य विरुद्धं प्रचाल्यमाने अभियाने सक्रिय-सहभागितां निर्वोढुम् आहूतवान्। सः प्रोक्तवान् यत् मादकतायाः विरुद्धं सङ्ग्रामः केवलं सर्वकारस्य आरक्षिणां च उत्तरदायित्वं नास्ति, अपि तु अत्र प्रदेशस्य युवकानां, पालकानां, शिक्षकाणां, समाजस्य च प्रत्येक-वर्गस्य भूमिका अनिवार्या वर्तते।

### १५ नवम्बर २०२५ तः आरब्धम् अभियानम् अस्ति वास्तविकं जनान्दोलनम्

संस्थानस्य प्रेक्षागृहे छात्रान् सम्बोधयन् आरक्षि-महानिदेशकः अवदत् यत् १५ नवम्बर २०२५ दिनाङ्के मुख्यमन्त्रिणः नेतृत्वे प्रारब्धम् इदं चिट्टा-विरोधि-अभियानं न केवलं सर्वकारीयं कार्यम्, अपि तु एकं वास्तविकं जनान्दोलनम् अस्ति। मुख्यमन्त्रिणः स्पष्टम् आवाहनम् अस्ति यत् हिमाचलस्य प्रत्येकः युवा अनेन सह योजनीयः। सः अकथयत् यत् युवा-शक्तिः अस्य आन्दोलनस्य महत्तमा शक्तिः भवितुं शक्नोति, शिक्षिताः युनश्च स्व-परिवेशे जनान् मादक-द्रव्याणां दुष्परिणामानां विषये सचेतयितुं प्रभावशालिनीं भूमिकां निर्वोढुं शक्नुवन्ति।

### अभियान्त्रिकी-कालस्य स्मृत्या सह सहजः संवादः

डीजीपी-महोदयः औपचारिक-पद-मर्यादां विहाय छात्रैः सह अतीव सहज-भावेन सम्बन्धं स्थापितवान्। स्वस्य अभियान्त्रिकी-अध्ययनस्य दिनानि संस्मृत्य सः छात्रेभ्यः अवदत् यत् अद्य यस्मिन् मार्गे ते चलन्ति, तस्मिन् मार्गे सोऽपि पूर्वं चलितवान्। सः छात्रान् न्यवेदयत् यत् ते तं केवलम् आरक्ष्यधिकारि-रूपेण न पश्येयुः, अपि तु अग्रज-मार्गदर्शक-रूपेण स्वीकुर्युः। स्व-सेवा-कालस्य अनुभवान् संविभज्य तेन छात्राः निरन्तरं नूतन-ज्ञानान्वेषणाय, जीवने च नूतनावसराणां प्राप्तये प्रेरिताः। सः स्पष्टीकृतवान् यत् वृत्ति-जीवने साफल्येन सह सामाजिक-दायित्वस्य निर्वहणम् अपि तावदेव महत्त्वपूर्णं वर्तते।

### आपात-सेवा-११२ तथा च तान्त्रिक-सहयोगाय आह्वानम्

आरक्षि-महानिदेशकेन छात्राः आरक्षि-विभागेन सह निरन्तरं संयोजिताः भवितुम् आह्वाताः। सः न्यवेदयत् यत् कस्यामपि आपत्-स्थितौ '११२' इति आपात-सङ्ख्यायां सम्पर्कः कर्तुं शक्यते। अस्मात् अतिरिच्य युवानः आरक्षि-विभागस्य सामाजिकाङ्कीय-मञ्चैः तथा च 'व्हाट्सएप्प्'-वाहिनीभिः सह अपि योजिताः भवेयुः, येन मादक-व्यवसाय-सम्बद्धाः सूचनाः समये आरक्षिभ्यः प्राप्येरन्।
कार्यक्रमे एनआईटी-हमीरपुर-संस्थानस्य हिमाचल-आरक्षि-विभागस्य च मध्ये पारस्परिक-सहयोगस्य वर्धनाय अपि विमर्शः जातः। एनआईटी-संस्थानस्य तान्त्रिक-विशेषाः छात्राश्च 'साइबर्-अपराध' , 'कृत्रिम-बुद्धिमत्ता', 'दत्त-विश्लेषणम्', 'साइबर्-सुरक्षा', आधुनिक-आरक्षण-प्रणाली (Modern Policing) इत्यादिषु परियोजनासु आरक्षि-विभागस्य साहाय्यं कर्तुं शक्नुवन्ति। अन्ततः आरक्षि-महानिदेशकेन जन-आरक्षिणोः मध्ये सुदृढ-संवादस्य आवश्यकतायां विशेष-बलं दत्तम्

## विपक्ष-नेतुः जयराम-ठाकुरस्य प्रश्नः — 'हिमकेयर'-अन्वेषणे आसक्तिः, कूट-औषधीनां चक्रव्यूहस्य अन्वेषणे असमर्थता किमर्थम् ?

**हिमसंस्कृतवार्ता — शिमला।**
पूर्व-मुख्यमन्त्री तथा च विधानसभायाः विपक्ष-नेता जयराम-ठाकुरः 'हिमकेयर'-योजनायाः अन्वेषणं लक्ष्यीकृत्य राज्य-सर्वकारस्य उपरि तीक्ष्णं प्रहारं कृतवान्। सः अवदत् यत् 'हिमकेयर'-योजनां कलङ्कयितुं सर्वकारः अन्वेषणस्य नाटकं रचयति, यत्रैव जनानां जीवनेन सह क्रीडतां कूट-औषधीनां (नकली दवाएं) चक्रव्यूहस्य सतर्कता-अन्वेषणात् पश्चात् धावति। जयराम-ठाकुरेण प्रश्नः उत्थापितः यत् उच्चन्यायालयस्य निर्देशानन्तरम् अपि 'विजिलेंस'-विभागेन अन्वेषणे असमर्थता-प्रकटनस्य पृष्ठे वस्तुतः कीदृशी दुर्भावना वर्तते?
शिमलातः प्रसारिते स्व-वक्तव्ये जयराम-ठाकुरः प्रतिपादितवान् यत् राज्य-सतर्कता-तथा-भ्रष्टाचार-विरोधी-ब्यूरो-संस्थया १ जुलाई २०२६ दिनाङ्के पत्रं प्रेषयित्वा अस्य प्रकरणस्य अन्वेषणे स्व-असमर्थता विज्ञापिता आसीत्। संस्थायाः पक्षतः कथितं यत् एतत् प्रकरणं वित्तीय-दृष्ट्या अतीव जटिलं वर्तते तथा च तस्याः समीपे पर्याप्त-मानव-संसाधनानाम्, आवश्यक-साधनानां, राजस्व-सम्बद्धस्य तान्त्रिक-ज्ञानस्य च अभावः अस्ति। एतादृश्यां स्थितौ एतावतः विशाल-वित्तीय-अपहारस्य अन्वेषणं कठिनं भवति।

### चिकित्सकीय-निर्णयानां समीक्षा-ज्ञानं कुतः आगतम् — जयराम-ठाकुरः

विपक्ष-नेत्रा प्रश्नः कृतः यत् यदि सतर्कता-विभागस्य समीपे जी.एस.टी.-कर-अपवञ्चनस्य तथा कूट-औषधीनां व्यापारस्य अन्वेषणाय तान्त्रिकं ज्ञानं नास्ति, तर्हि 'हिमकेयर'-योजनायाः अन्तर्गतं विशेषज्ञ-चिकित्सकैः स्वीकृतानाम् उपचार-सम्बद्ध-निर्णयानां समीक्षायाः ज्ञानं कुतः आगतम्? तेन आरोपः आरोपितः यत् हिमकेयर-योजनायाः अन्वेषणं केवलं मुख्यमन्त्रिणः वचनानि सत्यानि साधयितुं क्रियते।

### कूट-औषधीनां विक्रयः जी.एस.टी.-कर-अपवञ्चनस्य च प्रकरणम्

जयराम-ठाकुरः अवदत् यत् एकेन औषधि-निर्मात्रा कूट-औषधीनां विक्रयणाय जी.एस.टी.-कर-चोर्याय च प्रलेखेषु कूट-रचना कृता इति आरोपाः सम्मुखम् आगताः। अस्मिन्नेव प्रकरणे न्यायालयस्य समक्षम् अन्यत् प्रतिवेदनम् अपि प्राप्तम्, यस्मिन् सप्तविंशतितः अष्टाविंशति-टन् (२७-२८ टन) परिमितस्य अपक्व-पदार्थस्य अवैध-आपूर्तेः जी.एस.टी.-कर-अपवञ्चनस्य च विषयः उत्थापितः। अस्मिन् विषये विस्तृत-अन्वेषणस्य याचना कृता आसीत्।



सः अग्रे प्रोक्तवान् यत् भाजपा-नेतृणां तथा मुख्यमन्त्रिणः राजनैतिक-विरोधिनां विरुद्धं सतर्कता-विभागः युद्ध-स्तरे अभियोगान् पञ्जीकृत्य प्रश्नोत्तरीं करोति। अनेकेषु प्रकरणेषु तु अन्वेषण-समाप्तेः पूर्वमेव तथ्यानि वार्तापत्राणां माध्यमेन सार्वजनिकीक्रियन्ते। तथापि एतादृशस्य गम्भीर-प्रकरणस्य अन्वेषणात् सतर्कता-विभागस्य दूर-गमनम् अनेकान् संशयान् जनयति।

# हिमसंस्कृतम् न्यास द्वारा हिन्दी दिवसस्य समायोजनम्



**हिमसंस्कृतवार्ता।** हिन्दी दिवसोपरि सम्पूर्णे विश्वे विशेषोत्साहः साहित्यकारेषु दृष्टः। सर्वत्र हिन्दी भाषायाः संवर्धनाय कविसंगोष्ठ्यः साहित्यसभानाञ्चायोजनं सुष्ठुरूपेण सञ्जातम्। अस्मिन्नेव क्रमे हिमसंस्कृतम् न्यास द्वारा हिमसंस्कृतवार्ता इति आभासीये फेसबुकपटले हिन्दी भाषी कवि संगोष्ठी इत्यस्य कार्यक्रमस्य आयोजनं सञ्जातम्। कार्यक्रमेऽस्मिन् विशेषरूपेण हिमाचलस्य प्रबुद्धकवयः उपस्थिताः अभवन्, येषु कांगड़ा जनपदः पालमपुरनगरात् प्रसिद्धगीतगायकः काव्यकारश्च शक्तिचन्दराणा महोदयः उपस्थितः जातः। शक्तिचन्दराणा महोदयः शेषसाहित्यसदस्य निदेशकः अस्ति, यस्य सदनस्य प्रकल्पेन हिमाचले बह्व्यः काव्यसंगोष्ठ्याः कार्यक्रमाश्च भवन्ति। तेनैव क्रमे पालमपुरनगरात् सेवानिवृत्ता शिक्षिका सुरेशलता अवस्थी महोदया उपस्थिता, यया स्वीया काव्यमधुर्या काव्यसंगोष्ठ्याः मनः सम्मोहितः। युवाकाव्यकारेषु पालमपुरतः आकाशवाणी गायकः प्यारचन्दसिप्पी महोदयः स्वीयेन माधुर्येण कण्ठेन हिन्दीभाषायाः मार्मिकस्वरूपस्य चित्रणं स्वगीतेन कृतवान्। शिमलातः भाषा कला संस्कृति विभागस्य साहित्यसंवाद इति कार्यक्रमस्य प्रसिद्धः संयोजकः हितेन्द्र शर्मा हिन्दी भाषायाः कवितां पठितवान्। अस्मिन्नेव क्रमे हिमाचलस्य सिरमौरजनपदः प्रसिद्धः कविपुङ्गवः दलीपवसिष्ठः हिमाचलस्य लोकजीवनेन प्रभावितायाः काव्यमञ्जर्याः उपस्थापनं सर्वेषां समक्षं प्रस्तुतवान्, तस्य काव्ये अनुप्रासादीनाम् अलङ्काराणां प्रयोगेन सर्वेषां मनांसि आकर्षितानि। कार्यक्रमस्य सञ्चालकः रजनीश अवस्थी महोदयः उपमायाः सिद्धप्रयोगैः काव्यकाराणां मुक्तकण्ठेन प्रशंसां कृतवान्, तेषां काव्यचातुर्यस्य गुणगानं च कृतवान्। कार्यक्रमस्य अन्तः भगवत्याः शादरदायाः धन्यवादात्मकेन स्तवनेन अभवत्।

# हिन्दीभाषायाः महन्महत्तवम्

## दिनेशशास्त्री, सिरमौर

हिन्दी भारतस्य प्रमुखासु भाषासु एका अस्ति। अस्याः भाषा देवनागरीलिप्या लिख्यते। हिन्दीभाषा भारतस्य जनानां मध्ये भावानां विचाराणां च आदान-प्रदानस्य महत्त्वपूर्णं साधनम् अस्ति।

प्रतिवर्षं सितम्बर-मासस्य चतुर्दशे दिने हिन्दी-दिवसः आचर्यते। अस्मिन् दिने हिन्दीभाषायाः महत्त्वं, गौरवं, उपयोगिता च जनानां मध्ये प्रचार्यते। १९४९ तमे वर्षे सितम्बर-मासस्य चतुर्दशे दिने भारतीयसंविधानसभया हिन्दीभाषा देवनागरीलिप्या भारतस्य राजभाषारूपेण स्वीकृता। हिन्दी केवलं भाषा नास्ति, अपितु सा भारतीयसंस्कृतेः, सभ्यतायाः, भावनानां च सशक्तं माध्यमम् अस्ति। हिन्दीभाषायां विविधाः साहित्यिकाः ग्रन्थाः, काव्यानि, कथाः, नाटकानि च विरचितानि सन्ति। कबीरः, तुलसीदासः, सूरदासः, प्रेमचन्दः इत्यादयः महान् साहित्यकाराः हिन्दीभाषायाः गौरवं वर्धितवन्तः।

हिन्दीभाषा देशस्य विभिन्नप्रदेशानां जनान् परस्परं संयोजयति। अतः अस्माभिः हिन्दीभाषायाः सम्मानः करणीयः तथा च तस्याः शुद्धस्य, सरलस्य, समृद्धस्य च प्रयोगः करणीयः।

**हिन्दी अस्माकं गौरवम् अस्ति, हिन्दी अस्माकं सांस्कृतिकपरिचयः अस्ति**

वयं सर्वे मिलित्वा हिन्दीभाषायाः संरक्षणं, संवर्धनं, प्रचारं च कुर्याम। हिन्दीभाषायाः यशः सर्वत्र प्रसरेत्—इति अस्माकं शुभकामना।

**विशेषसन्देशः** “हिन्दीभाषा अस्माकं गौरवस्य प्रतीकं, एकतायाः सूत्रं, भारतीयसंस्कृतेः सशक्तं माध्यमं च अस्ति। अतः वयं हिन्दीभाषां सम्मानयेम, तस्याः प्रयोगं वर्धयेम, भावीपीढीभ्यश्च तस्याः महत्त्वं बोधयेम।”

# हिन्दीभाषा अस्माकम् अस्मिता परिचययोः अङ्गं वर्तते— प्राचार्यः



**नवगछिया (भागलपुर)१४/०९/२०२६**
**हिम संस्कृत वार्ताः- डॉ विमलेश झा**

राजकीयस्नातकमहाविद्यालये, खरीकक्षेत्रे हिन्दीदिवसस्यावसरे ‘राष्ट्रीयैकतायाः भाषा हिन्दी’ इति विषयमधिकृत्य सङ्गोष्ठ्याः आयोजनं सोमवासरे अभवत्। सङ्गोष्ठ्यां प्राध्यापक-वक्तृभिः हिन्दीभाषायाः व्यावहारिकोपयोगितायाः तथा राष्ट्रियैकतायां तस्याः भूमिकायाः विषये विस्तृततया चर्चा कृता। वक्तृभिः हिन्दीभाषायाः अधिकाधिकप्रयोगेन सह भाषायाः शुद्धोच्चारणे शुद्धप्रयोगे च विशेषबलं दत्तम्।सङ्गोष्ठ्याः सञ्चालनं कुर्वन् हिन्दीविषयस्य प्राध्यापकः डा. चैतन्यप्रकाशः अवदत् यत् पाठ्यक्रमः विद्यार्थिभ्यः हिन्दीभाषायाः पठनस्य लेखनस्य च ज्ञानं ददाति, किन्तु शुद्धहिन्दीभाषणस्य पर्याप्तः अभ्यासः न भवति। हिन्दीभाषायाः विकासाय भाषायाः शुद्धता अत्यावश्यकी अस्ति। तेन उक्तं यत् आगामिकाले महाविद्यालये अध्ययनरतविद्यार्थिभ्यः शुद्धोच्चारणस्य नियमिताभ्यासः कारयिष्यते, येन ते हिन्दीभाषायाः प्रभाविपूर्वकं शुद्धतया च प्रयोगं कर्तुं समर्थाः भविष्यन्ति। अध्यक्षीयसम्बोधने महाविद्यालयस्य प्राचार्यः डा. जलेश्वरसिंहः अवदत् यत् हिन्दी-दिवसः अस्माकम् अस्मितया परिचयेन च सम्बद्धः महत्त्वपूर्णः अवसरः अस्ति। तेन उक्तं यत् विश्वस्य विभिन्नेषु भागेषु हिन्दीभाषिणः जनाः निवसन्ति तथा हिन्दीभाषा वैश्विकस्तरेऽपि शीघ्रं विस्तारं प्राप्स्यति।तेन विद्यार्थिभ्यः आह्वानं कृतं यत् ते दैनन्दिनजीवने हिन्दीभाषायाः अधिकाधिकं प्रयोगं कुर्वन्तु। समाजशास्त्रस्य प्राध्यापकः डा. ब्रजेशसिंहः अवदत् यत् हिन्दीभाषायै राष्ट्रभाषायाः पदं प्रदातव्यम्। अस्य कृते दैनन्दिनजीवने व्यावहारिककार्येषु च हिन्दीभाषायाः अधिकाधिकप्रयोगस्य आवश्यकता अस्ति। अर्थशास्त्रस्य प्राध्यापकः डा. प्रिन्सः अवदत् यत् भाषा केवलं संवादस्य माध्यमं नास्ति, अपि तु समाजस्य संस्कृतेः च संयोजने महत्त्वपूर्णं माध्यमम् अस्ति। तेन विद्यार्थिनः हिन्दीभाषायाः अध्ययनाय प्रयोगाय च प्रेरिताः। कार्यक्रमस्य अवसरे अनेके छात्राः हिन्दीविषयकाः कविताः भाषणानि च प्रस्तुतवन्तः। विद्यार्थिभिः हिन्दीभाषायाः उपयोगिता, राष्ट्रियैकतायां तस्याः भूमिका तथा भाषायाः संरक्षण-विकासयोः सम्बन्धिताः विचाराः प्रस्तुताः।अस्मिन् अवसरे डा. अरुणः, डा. सैफः, कृष्णकुमारः इत्यादयः महाविद्यालयस्य शिक्षकाः छात्र-छात्राश्च उपस्थिताः आसन्। छात्रेषु अभिनाशकुमारः, बाबूसाहबः, सूरजकुमारः, प्रिन्सकुमारः, गौरवकुमारः इत्यादयः आसन्।






# संस्काराणां जननी भारतीयसंस्कृतेश्च परिचायिका हिन्दी : डॉ. गङ्गवारः

## डीपीएस बोकारो विद्यालये राजभाषासशक्तीकरणस्य सङ्कल्पः प्रतिध्वनितः

संवाददाता प्रेरकः च -सौरभः दे

बोकारोनगरम्। "हिन्दी केवलं भाषा नास्ति, अपितु सा अस्माकं संस्काराणां जननी समृद्धभारतीयसंस्कृतेश्च परिचायिका अस्ति। सा अस्माकं भावनाः, परम्पराः, संस्कृतिं विचारान् च सुदृढया कयाचित् सूत्ररूपया कडिकया परस्परं संयोजयति। हिन्दीभाषायां सम्बन्धानां माधुर्यम् अस्माकं देशस्य मृत्तिकायाः सुगन्धश्च निहितः अस्ति। अन्याः भाषाः यद्यपि अस्मान् विश्वेन सह संयोजयन्ति, तथापि हिन्दी अस्मान् अस्माकं स्वकीयैः मूलैः सह संयोजयति। येषां मूलानि सुदृढानि भवन्ति, ते एव द्रुततरं प्रगतिं कर्तुं शक्नुवन्ति।" इति दिल्ली-पब्लिक-स्कूल-बोकारो-विद्यालयस्य प्राचार्यः डॉ. ए. एस. गङ्गवारः उक्तवान्। सोमवासरे विद्यालये आयोजिते हिन्दी-दिवस-समारोहे सम्बोधनं कुर्वन् प्राचार्यः एताः उक्तीः अवदत्। विविधैः कार्यक्रमैः सह विद्यालयस्य प्राथमिक-वरिष्ठयोः उभयोरपि विभागयोः हिन्दी-दिवसः हर्षोल्लासपूर्वकं समाचरितः। अस्मिन् अवसरे विद्यालये राजभाषासशक्तीकरणस्य सङ्कल्पः प्रतिध्वनितः। विद्यार्थिभिः शिक्षकैः च सह समग्रविद्यालयपरिवारेण हिन्दीभाषायाः संरक्षण-संवर्धनयोः प्रति स्वकीयां प्रतिबद्धतां व्यक्तीकृतम्। प्राचार्यः हिन्दी-दिवसस्य आयोजनस्य पृष्ठभूमिं प्रकाशयन् अवदत्— "अस्माभिः स्वकीया भाषा कदापि न्यूनतया न द्रष्टव्या। इतिहासः साक्षी अस्ति यत् यः देशः स्वकीयां भाषां विस्मरति, सः स्वसंस्कृतिं स्वकीयां च परिचयं शनैः शनैः त्यजति। अतः अस्माभिः स्वभाषायाः सम्मानः सर्वदा करणीयः।" अस्मिन् क्रमे प्राचार्यः विद्यार्थिभ्यः अर्धवार्षिक-परीक्षायै शुभकामनाः अपि प्रदत्तवान्। सः विद्यार्थिभ्यः पूर्णया लग्नतया, परिश्रमेण, निष्ठया तत्परतया च अध्ययनं कर्तुं सन्देशं दत्तवान्। अवसरेऽस्मिन् हिन्दी-दिवसस्य विशेष-प्रार्थनासभायाः समग्रं कार्यकलापं हिन्दीभाषायामेव सुरुचिपूर्णतया सम्पन्नम् अभवत्। वरिष्ठविभागे छात्रः मन्नत-पाण्डेयः "हिन्दी अस्माकं परिचयः, हिन्दी एव अस्माकं गौरवम्..." इत्यादिकवितायाः सस्वरं पाठं कृत्वा सर्वान् भावविभोरान् अकरोत्। करतलध्वनिभिः प्रतिध्वनिते वातावरणे अन्यः छात्रः अर्थित-सिंहः "आगन्तारः शिकारीणः मम ग्रामे..." इत्याख्यायाः कवितायाः मधुरं पाठं कुर्वन् नेतृणाम् अवसरवादितायाः विषये व्यङ्ग्यं प्रस्तुतवान्। अस्मिन् क्रमे विद्यालयस्य हिन्दी-विभागस्य पक्षतः हिन्दी-दिवसस्य उपलक्ष्ये प्रकाशितायाः गृहपत्रिकायाः 'स्वरा' इत्यस्याः सितम्बर-मासस्य २०२६-वर्षीयस्य संस्करणस्य विमोचनमपि कृतम्। पत्रिकायां विद्यालयस्य छात्र-छात्राणां शिक्षकाणां च विविधाः रचनाः आकर्षकसज्जया प्रस्तुताः सन्ति। एवमेव प्राथमिकविभागे बालकैः विविधैः रङ्गारङ्गकार्यक्रमैः स्वमातृभाषायाः प्रति सम्मानः प्रदर्शितः। विद्यार्थिभिः "हिन्दीभाषा सर्वाधिकप्रिया..." इति समूहगानं तथा च एकं पथनाटकम् प्रस्तुतं कृत्वा सर्वेषां मनांसि आकृष्टानि। हिन्दी-पक्षस्य अन्तर्गतं आयोजितेषु स्वरचित-कवितापाठे, मुहावराणां प्रस्तुतौ, प्रहेलिकाप्रतियोगितायां च अन्येषु विविधेषु सृजनात्मककार्यक्रमेषु विद्यार्थिभिः उत्साहपूर्वकं सक्रियतया च सहभागिता कृता।

# मिथिलावासिभिः श्रद्धापूर्वकं कृतं चौठचन्द्रव्रतम्



**चित्रपरिचयः — पूजायां समुपविष्टा मिथिलानी जयन्ती पाठकमहोदया**

बोकारो। बोकारोनगरे निवसद्भिः मिथिलाक्षेत्रसम्बद्धैः जनैः सोमवासरे श्रद्धया हर्षोल्लासेन च चौठचन्द्रपूजा समनुष्ठिता। कलासंस्कृत्योः वैशिष्ट्येन प्रसिद्धे मिथिलाक्षेत्रे विविधाः पर्वोत्सवाः विशिष्टरीत्या आचर्यन्ते। गणेशचतुर्थी यद्यपि सम्पूर्णे देशे श्रद्धया उत्साहेन च आचर्यते, तथापि मिथिलाक्षेत्रस्य जनाः तामेव चौठचन्द्रपूजा अथवा चौरचनपूजा इति नाम्ना विशेषरूपेण आचरन्ति।

भाद्रपदमासस्य शुक्लपक्षे चतुर्थ्यां तिथौ आचर्यमाणमिदं पर्व मिथिलाक्षेत्रवासिनां कृते विशेषमहत्त्वपूर्णम् अस्ति। अस्मिन् दिने रोहिणीनक्षत्रयुक्तस्य चन्द्रमसः पूजनं विधीयते। व्रतिन्यः महिलाः दिवसभरम् उपवासं कृत्वा सायंकाले विधिविधानपूर्वकं पूजां कुर्वन्ति।

पूजायाः पूर्वं ताभिः विशेषप्रकारकम् अरिपनम् (अल्पना) रच्यते। ततः तस्योपरि दीपयुक्तः कलशः स्थाप्यते। विविधप्रकारकाः पूरिका-पक्वान्नानि, फलानि, दधि, ताम्बूलपत्राणि च समर्प्य विधिपूर्वकं पूजा क्रियते। अनन्तरं परिवारस्य सर्वे सदस्याः सज्जीकृतां डालीं फलानि च गृहीत्वा चन्द्रमसं प्रणमन्ति। लोकविश्वासानुसारम् अस्मिन् दिने चन्द्रमसः दर्शनं रिक्तहस्तेन न करणीयम्। फलैः अथवा कस्यचित् पक्वान्नेन सह एव चन्द्रदर्शनं करणीयम्, अन्यथा कलङ्कः जायते इति जनश्रुतिः अस्ति। मिथिलाक्षेत्रस्य परम्परानुसारं मिथिलानरेशेन हेमाङ्गदठाकुरेण अस्य पर्वणः आचरणस्य परम्परा प्रारब्धा इति मान्यता प्रचलिता अस्ति।

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य काश्चन विचित्राः वार्ताः मया आनीताः। प्रथमम्, असम-प्रान्ते एकेन वन्य-गजेन कन्दुक-क्रीडा कृता।

**नन्दिनी-** अहो आश्चर्यम्! गजेन अपि क्रीडितम्! एतत् अतीव विनोदपूर्णम्। अन्या वार्ता का?

**काव्या-** थैलान्ड-देशे अरण्ये वैज्ञानिकैः एकं विचित्रं 'राक्षस-पुष्पम्' दृष्टम्। तेन पुष्पेण सूर्य-प्रकाशः न उपयुक्तः।

**नन्दिनी-** सूर्य-प्रकाशं विना पुष्पम्? प्रकृत्या अद्भुतं रूपं दर्शितम्। अग्रे किम्?

**काव्या-** अमेरिका-देशे एकेन छदिष्परीक्षकेण प्रमादात् पाकशालायाः छदिः भग्नम्। सः अकस्मात् ततः अधः पतितः।

**नन्दिनी-** हह! परीक्षकेण एव छदिः भग्नम्! तस्मिन् गृहे महान् कोलाहलः जातः। अन्तिमा वार्ता का?

**काव्या-** अपावकस्थाने एकस्य न्यायाधीशस्य गृहे चोरेण केवलं द्वे सेवफले एकं क्षालन-द्रवं च चोरितानि।

**नन्दिनी-** केवलं फले चोरिते? चोरेण अपि स्वच्छतायै स्वास्थ्यस्य कृते च ध्यानं दत्तम्! धन्यवादः काव्ये।

काव्या- स्वागतं नन्दिनि।

हिमसंस्कृतवार्ताः, ईदरधीरराजः

# हिन्दीदिवसोपलक्ष्ये राजकीय-उच्चविद्यालये सिरमौरीताले विविधप्रतियोगितानाम् आयोजनम्



**सिरमौरः, हिमाचलप्रदेशः।**
हिन्दीदिवसस्य उपलक्ष्ये राजकीय-उच्चविद्यालये सिरमौरीताले हिन्दीभाषायाः महत्त्वं, गौरवं, समृद्धां परम्परां च प्रतिपादयन् विविधाः कार्यक्रमाः प्रतियोगिताश्च आयोजिताः। अस्मिन् अवसरे षष्ठीकक्षातः दशमीकक्षापर्यन्तं विद्यार्थिनः उत्साहपूर्वकं भागं गृहीत्वा हिन्दीभाषायाः प्रति स्वकीयां प्रतिभां, ज्ञानं, प्रेम च प्रदर्शितवन्तः।
कार्यक्रमस्य शुभारम्भः विद्यालयस्य कार्यवाहक-अध्यापकेन श्रीदिनेशचौधरी-महोदयेन कृतः। प्रतियोगितानाम् आरम्भात् पूर्वं विद्यालयस्य भाषाध्यापिका श्रीमती रिङ्कीदेवी-महोदया विद्यार्थिभ्यः हिन्दीभाषायाः विषये विस्तृतां जानकारीं प्रदत्तवती। तया हिन्दीभाषायाः इतिहासः, विकासः, साहित्यिकसमृद्धिः, भारतीयसंस्कृतौ योगदानं तथा दैनिकजीवने हिन्दीभाषायाः महत्त्वं च प्रकाशिता। सा विद्यार्थिभ्यः हिन्दीभाषायाः प्रति गौरवभावनां सम्मानभावनां च धारयितुं प्रेरणां दत्तवती।
अस्मिन् अवसरे विद्यार्थिभ्यः हिन्दीभाषण-प्रतियोगिता तथा प्रश्नोत्तरीप्रतियोगिता आयोजिते। भाषणप्रतियोगितायां विद्यार्थिनः हिन्दीभाषायाः महत्त्वं, सरलतां, व्यापकतां तथा भारतीयसंस्कृतेः साहित्यस्य च संरक्षणे हिन्दीभाषायाः भूमिकां विषये स्वकीयविचारान् प्रभावशालिरूपेण प्रस्तुतवन्तः। प्रश्नोत्तरीप्रतियोगितया विद्यार्थिनां हिन्दी-साहित्यस्य, व्याकरणस्य तथा सामान्यहिन्दीज्ञानस्य च परीक्षणं कृतम्।
कार्यक्रमे विद्यार्थिभ्यः सम्बोधयन्तः वक्तारः अवदन् यत् हिन्दीभाषा केवलं संवादस्य माध्यमं नास्ति, अपितु अस्माकं संस्कृतेः, संवेदनायाः, साहित्यस्य राष्ट्रियैकतायाश्च सशक्तम् अभिव्यक्तिमाध्यमम् अस्ति। हिन्दीभाषायाः समृद्धा साहित्यिकपरम्परा समाजाय विचारान्, संस्कारान् नूतनां दिशां च प्रदातुं महत्त्वपूर्णां भूमिकां निर्वहति।
कार्यक्रमे विद्यालयस्य अध्यापकाः श्रीविक्रमठाकुर-महोदयः, श्रीमतीविजयामहोदया, भाषाध्यापिका श्रीमतीरिङ्कीदेवी-महोदया, शारीरिकशिक्षकः श्रीखुशीरामबंसल-महोदयः तथा श्रीदेवेन्द्रशर्मा-शास्त्रीमहोदयः इत्यादयः सर्वे अध्यापकाः उपस्थिताः आसन्। सर्वैः अध्यापकैः विद्यार्थिनः प्रोत्साहिताः तथा हिन्दीभाषायाः अधिकाधिकप्रयोगाय अध्ययनाय च प्रेरिताः।
विद्यालयपरिवारेण विद्यार्थिभ्यः सन्देशः प्रदत्तः यत् हिन्दीभाषायाः सम्मानः केवलं हिन्दी-दिवसपर्यन्तं सीमितः न भवेत्, अपितु विद्यालये, गृहे, दैनिकजीवने च हिन्दीभाषायाः शुद्धः, सहजः प्रभावश्च प्रयोगः निरन्तरं वर्धनीयः।

**हिन्दी अस्माकं सम्मानः**

## हिन्द्या सह सम्बद्धा अस्माकं संस्कृतिः भारतभूमिश्च।"

कार्यक्रमस्य मुख्योद्देश्यम् विद्यार्थिषु हिन्दीभाषायाः प्रति प्रेम, गौरवम् आत्मीयतां च वर्धयितुं तथा हिन्दीभाषायाः अध्ययनाय प्रयोगाय च तान् प्रेरयितुम् आसीत्।

# राजकीय-उत्कृष्ट-वरिष्ठ-माध्यमिक-पाठशाला-कोठी-धीमाने हर्षोल्लासेन संमानितः हिन्दी-दिवसः

कोठी धीमान, १४ सितम्बर:राजकीय-उत्कृष्ट-वरिष्ठ-माध्यमिक-पाठशाला कोठी धीमाने अद्य 'हिन्दी-दिवसः' महता हर्षोल्लासेन उत्साहेन च संमानितः। अस्मिन् विशेषे अवसरे विद्यालय-परिसरे विविधाः साहित्यिकाः सांस्कृतिकाः च प्रतियोगिताः आयोजिताः अभवन्, यत्र छात्राः सोत्साहं भागं गृहीतवन्तः।कार्यक्रमस्य आरम्भे विद्यालयस्य कार्यकारी-प्रधानाचार्या श्रीमती रीना रानी महोदया सर्वेभ्यः शिक्षकेभ्यः छात्रेभ्यः च हिन्दी-दिवसस्य हार्दिकाः शुभाशयाः प्रकटितवती। तदनन्तरं, प्रशिक्षित-स्नातक-शिक्षकः (हिन्दी) श्री जीत राम शर्मा महोदयः छात्रान् हिन्दीभाषायाः महत्त्वं तस्याः गौरवशालि-इतिहासं च बोधितवान्। सः विद्यार्थिनः दैनन्दिनजीवने हिन्दीभाषायाः अधिकतमाय उपयोगाय, तस्याः प्रति गौरवानुभवाय च प्रेरितवान्।विविध-प्रतियोगितानां परिणामाः:श्री जीत राम शर्मा महोदयस्य मार्गदर्शने आयोजितासु विविधासु गतिविधिषु प्रतियोगितासु च छात्राः स्वप्रतिभायाः उत्कृष्टं प्रदर्शनं कृतवन्तः। प्रतियोगितानां परिणामाः इत्थं सन्ति:भाषण-प्रतियोगिता (कनिष्ठ-वर्गः): आराध्य शर्मा प्रथमं स्थानं प्राप्नोत्।भाषण-प्रतियोगिता (वरिष्ठ-वर्गः): अभिषेक चौहानः प्रथम-स्थाने अभवत्।प्रश्नोत्तरी (क्विज़): गान्धी-सदनेन प्रथमं स्थानं लब्धम्।निबन्ध-लेखनम्: विवेकानन्द-सदनस्य छात्रः अरुणः प्रथम-स्थाने अतिष्ठत्।घोषवाक्य-लेखनम् (नारा लेखन - कनिष्ठ-वर्गः): काजलः प्रथमं स्थानं प्राप्तवती।चित्रकला (वरिष्ठ-वर्गः): विनोदः प्रथम-स्थानं प्राप्नोत्।कार्यक्रमस्य समापने सर्वासु प्रतियोगितासु उत्कृष्ट-प्रदर्शनं कृतवन्तः, तथा च प्रथम-द्वितीय-तृतीय-स्थानं प्राप्तवन्तः सर्वे विजेतारः छात्राः पुरस्कारैः संमानिताः वर्धापिताः च।अन्ते, मुख्य-आयोजकः श्री जीत राम शर्मा महोदयः कार्यक्रमस्य साफल्याय कार्यकारी-प्रधानाचार्या-महोदयायाः, सर्वेषां सहयोगी-शिक्षकाणां, छात्राणां च कृतज्ञतां ज्ञापितवान्। अस्मिन् अवसरे विद्यालयस्य सर्वे शिक्षकाः, कर्मचारिणः, छात्राः च उपस्थिताः आसन्।






# भिवानीविभागे २३ सम्भाषण-शिबिराणाम् अभवत् भव्यं समापनम्

संस्कृतभारती, हरियाणा, (न्यासः) इत्यनेन भिवानीविभागस्य त्रिषु जनपदेषु (भिवानी-चरखीदादरी-महेन्द्रगढेषु) सितम्बरमासस्य एक-दिनाङ्कतः द्वादश-दिनाङ्कपर्यन्तं 23 संस्कृतसम्भाषणशिबिराणाम् आयोजनं कृतम्। एतेषां सर्वेषां संस्कृतसम्भाषणशिबिराणां समापनसमारोहः एकत्र 13.09.2026 तमे दिनाङ्के भिवान्यां सिद्धपीठम्, बाबाजहरगिरि-आश्रमः इत्यस्मिन् स्थाने अभवत्। अस्मिन् कार्यक्रमे भिवानीमहेन्द्रगढक्षेत्रस्य सांसदः चौ. धर्मवीरसिंहः, मुख्यातिथिः, देहल्याः निगमपार्षदः श्रीधर्मवीरमहोदयः श्रीमती सावित्री यादवो विशिष्टातिथिः च आसीत्। संस्कृतभारत्याः उत्तरक्षेत्रसङ्गटनमन्त्री श्रीनरेन्द्रमहोदयः अस्य कार्यक्रमस्य मुख्यवक्ता आसीत्। कार्यक्रमोऽयं सिद्धपीठम्, बाबाजहरगिरि-आश्रमः इत्यस्य कैलाशगिरिमहाराजस्य सान्निध्ये सम्पन्नः अभवत्। कार्यक्रमस्य आरम्भो वैदिकमन्त्राणाम् उच्चारणेन सह दीपं प्रज्वाल्य अभवत्। संस्कृतभारती, हरियाणाप्रान्तस्य मन्त्रिणा श्रीप्रमोदमहोदयेन सर्वेषाम् अतिथीनां परिचयः कारितः। अतिथीनां स्वागतं आच्छादकाङ्गवस्त्राभ्यां कृतम् । संस्कृतभारती-भिवानीविभागस्य संयोजकः श्रीरणजीतः अस्य शिबिराभियानस्य वृत्तं प्रस्तुतवान्। तदनन्तरं सांसदः चौ. धर्मवीरसिंहः विभिन्नैः उद्धरणैः देवभाषा-संस्कृतस्य उपयोगिताविषये चर्चां कृतवान्। सांसदमहोदयः संस्कृतसम्भाषणशिबिराणां प्रशंसाञ्च अकरोत्। श्रीधर्मवीरपार्षदः संस्कृतेन वैज्ञानिकशोधस्य चर्चाम् अकरोत्। श्रीनरेन्द्रमहोदयः स्ववक्तव्ये देवनिर्मित-भारतभूमेः ज्ञानपरम्परायाः वर्णनम् अकरोत्। महोदयः उक्तवान् भारतस्य 'विश्वगुरुः' इति उपाधेः कारणं संस्कृतभाषायां निहितं ज्ञानमेव अस्ति, अतः विश्वस्य नेतृत्वकरणाय भारतीयजनैः संस्कृतभाषा पठनीया आचरणे च धारणीया। संस्कृतसम्भाषणशिबिरेषु पठितैः विभिन्नैः छात्रैः संस्कृतभाषायां मन्त्रोच्चारण-श्लोक-गीत-नाटक-इत्यादयः प्रस्तुतयः प्रस्तुताः । संस्कृतसम्भाषणशिबिराणां शिक्षकाणाम् अङ्गवस्त्रैः सम्मानं कृतम्। कार्यक्रमस्य अन्ते डा.. जयपालशास्त्री धन्यवादज्ञापनं कृतवान्। कार्यक्रमे मञ्चसञ्चालनं श्रीसुनीतामहोदया श्रीसोमबीरमहोदयः च अकुरुताम्। कार्यक्रमेऽस्मिन् श्रीदेवांशकृष्णः श्रीमान् अशोकबुचौली, डा.. सोमबीरशास्त्री, डा.. सुमनरानी, डा.. सुमितशर्मा, श्रीदीपकशर्मा, श्रीकुलदीपपार्षदः इत्यादयः गणमान्याः जनाः विभिन्नानां विद्यालयानां बहवः छात्राः शिक्षकाश्च उपस्थिताः आसन्।





# श्रीसिद्धबलीगुरुकुल-संस्कृतविद्यालये उल्लासेन समायोजितः हिन्दीदिवसः

हिमसंस्कृतवार्ता। कुलदीपमैन्दोला।

कोटद्वारं। श्रीसिद्धबलीगुरुकुलसंस्कृतविद्यालये हिन्दीदिवसस्य उपलक्ष्ये विशेषकार्यक्रमः समुत्साहेन सम्पन्नः। कार्यक्रमस्य मुख्योद्देश्यः छात्रेषु हिन्दीभाषायाः गौरवबोधनं राष्ट्रभाषायाः महत्त्वस्य च संवर्धनमासीत्। विद्यालयस्य व्यवस्थापकः डा. रमाकान्तकुकरेती हिन्दीदिवसस्य विषये सविस्तरं व्याख्यानं प्रदाय उक्तवान् यत् हिन्दीभाषा केवलं भाषा नास्ति, अपितु भारतीयसंस्कृतेः राष्ट्रियैक्यस्य जनमानसानां भावनानां च सशक्तं सेतुरस्ति। तेन स्वीयस्वरचितकवितायाः माध्यमेन समस्त-देशवासिभ्यः हिन्दीभाषायाः महिमा, सरलता, आत्मीयता च प्रेरणादायकरूपेण प्रस्तुता। कार्यक्रमस्य अध्यक्षता प्रधानाचार्यः अशोककुमारजोशी अकरोत्। अस्मिन्नवसरे ऋषिकुमाराः अशुमन्, आदित्यः, आयुष्मान्, निखिलः इत्यादयः छात्राः भावपूर्णेन शैलीना हिन्दीकवितानां वाचनं कृत्वा उपस्थितानां प्रशंसामवापुः। अन्ते सर्वैः हिन्दीभाषायाः संरक्षणं, संवर्धनं, दैनन्दिनजीवने अधिकप्रयोगश्च इति सामूहिकः सङ्कल्पः स्वीकृतः। एषः हिन्दीदिवसोत्सवः विद्यालयपरिवारस्य कृते प्रेरणादायकः स्मरणीयश्च अभवत्।

## " संस्कृत कथा मञ्जरी" {१८} द्वात्रिंशत्पुत्तलिकासिंहासनम्।। " ब्राह्मणीशापमोचनं नाम द्वादशोपाख्यानम्"(२)

ततो नानादेशं परिभ्रमन् हिमाचलसमीपस्थितं नगरमेकमगमत् | तस्य नातिदूरे वेणूनां वनमासीत् | तत् ग्रामाभ्यन्तरं गत्वा रात्रौ कस्यचिगृहे वेदिकायां सुष्वाप | अत्रान्तरे अर्धरात्रसमये वेणुवनमध्ये रुदन्त्याः कस्यचित् स्त्रिया हाहारवेण जागरितः स एवं रोदनध्वनिमश्रौषीत्-- भो महाजनाः! मां परित्रायध्वं परित्रायध्वं, कोऽपि राक्षसो मां मारयति इति |

ततः प्रभातसमये ग्रामस्थान् जनान् अपृच्छत्-- भो महोदयाः ! किमेतदत्र वेणुवनमध्ये काचित् स्त्री रात्रौ रोदिति | तैरुक्तम्-- अत्र वेणुवनमध्ये प्रतिरात्रि रोदनध्वनिः श्रूयते परं न कोऽपि तत्र भयाङ्गच्छति न विचारयति च |




ततः पुरन्दरः कियत्कालानन्तरं स्वनगरमागत्य राजानमद्राक्षीत् | ततो राज्ञा पृष्टः-- भो पुरन्दर! देशान्तरं गच्छता त्वया किं किमपि अपूर्वं दृष्टम्? ततः पुरन्दरो वेणुवन वृतान्तं राज्ञे समकथयत् | तत् कौतुकं श्रुत्वा राजा तेन सह तन्नगरं गत्वा, रात्रौ वेणुवनमध्ये स्त्रिया रोदनशब्दं श्रुत्वा यावद्वनमध्ये प्रविशति, तावदतिभयङ्कररूपं; अनाथां स्त्रियं मारयन्तं राक्षसमेकमपश्यत्, अब्रवीच्च--

रे पापिष्ठ ! स्त्रियमनाथां किमर्थं ताडयसि? राक्षसेनोक्तं-- तव किमनेन विचारेण? त्वमात्ममार्गेण गच्छ, अन्यथा वृथैव मम हस्तात मरिष्यसि | तच्छुत्वा राजा कुपितः तं खड्गेन अताडयत् ,ततश्च उभयोर्युद्धं जातम् ; राज्ञा स राक्षसो मारितः |

**डा.. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**